**B** SL. No. : N

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 50 ]
Total No. of Questions : 50 ]

**CCE RR**
**UN-REVISED**

[ ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8
[ Total No. of Printed Pages : 8

**ಸಂಕೇತ ಸಂಖ್ಯೆ : 16-S** **Code No. : 16-S**

# ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ
# Subject : First Language — SANSKRIT
# प्रथम भाषा — संस्कृतम्

**( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )**

**( ಪುನರಾವರ್ತಿತ ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / Regular Repeater )**

ದಿನಾಂಕ : 22. 06. 2018 ] [ Date : 22. 06. 2018

ಸಮಯ : ಬೆಳಿಗ್ಗೆ 9-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 12-30 ರವರೆಗೆ ] [ Time : 9-30 A.M. to 12-30 P.M.

ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] [ Max. Marks : 100

### *ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗೆ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :*

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 50 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

### *छात्रं प्रति सामान्यनियमाः*

1. अस्मिन् प्रश्नपत्रे पञ्चाशत् (50) वस्तुनिष्ठाः व्यक्तिनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तय । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति पर्यालोचय ।
3. व्यक्तिनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकतयाः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारिता समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । यस्मिन् पञ्चदशपलानि प्रश्नपत्रस्य पठनार्थं निर्धारितानि सन्ति ।



इतः कर्तय
TEAR HERE TO OPEN THE QUESTION PAPER
प्रश्नपत्रमुद्घाटयितुमत्र कर्तय
Tear here

## भागः - A

### ( गद्य-पद्य-पूरकपाठाः )

### ( 62 अङ्काः )

I. एकवाक्येन उत्तरं लिखत — 11 × 1 = 11

1. भूमिं परितः कः प्रदक्षिणं करोति ?
2. ज्ञानपीठप्रशस्ति पुरस्कृतः संस्कृतसाहित्यकारः कः ?
3. वज्रायुधेन वृत्रं कः जघान ?
4. राजारामस्य पिता कः ?
5. कर्णस्य सारथिः कः ?
6. चतुर्विधपुरुषार्थेषु अन्तिमः पुरुषार्थः कः ?
7. भारतमाता कैः पूजिता ?
8. नाट्यशास्त्रस्य रचयिता कः ?
9. पाण्डवेषु कः राजपदवीम् अलभत ?
10. भरतखण्डः तिसृषु दिक्षु कैः आवृतः ?
11. सम्पदः कं वृणते ?

II. चतुर्थपदं लिखत — 4 × 1 = 4

12. महासुराः – मायाविनः :: सुकृतशालिनः – .........................।
13. अञ्जनापतिः – केसरी :: शचीपतिः – ........................... ।
14. शुभेन कर्मणा – सुखम् :: पापेन कर्मणा – ........................... ।
15. अयुक्तेन प्राणायामेन – सर्वरोगसम्भवः :: युक्तेन प्राणायामेन – ........................... ।

III. लघूत्तराणि संस्कृतभाषया लिखत — 4 × 2 = 8

16. पादपजातयः काः ? तासां जन्म कथं भवति ?
17. औरङ्गजेबेन प्रेषिते सन्देशपत्रे किं लिखितम् ?
18. रमारमणस्य कर्णसरणिम् अवतीर्णा अशरीरिणी वाणी का ?
19. नरस्य वृत्तं के जानन्ति ?

**अथवा**

सतां सङ्गः किं किं करोति ?

IV. श्लोकतात्पर्यं कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत – 2 × 2 = 4

20. ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।

तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् ।।

21. शृङ्गारहास्यकरुणाः रौद्रवीरभयानकाः ।

बीभत्साद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः ।।

**अथवा**

आङ्गिको वाचिकश्चैव आहार्यः सात्विकस्तथा ।

चत्वारोऽभिनया ह्येते विज्ञेया नाट्यसंश्रयाः ।।

V. कव्योः देश-काल-कृतीनां विषये लिखत – 2 × 3 = 6

22. भासः ।

23. डा० के०एस० नागराजन् ।

VI. यथानिर्देशम् उत्तरं लिखत – 3 × 3 = 9

24. किं भवेत् ? मम समीपे ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

25. "संस्कृतेनैव संस्कृतिरपि सुरक्षिता ?"

कः पाठः ? कः अवदत् ? केन संस्कृतिः सुरक्षिता ?

26. रसे गन्धे न रज्यते ।

कः पाठः ? कः अवदत् ? कः न रज्यते ?

**अथवा**

किंस्वित् श्रेष्ठतरं भवेत् ?

कः पाठः ? कः अपृच्छत् ? कम् अपृच्छत् ?

VII. दशवाक्यैः उत्तरं कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत – 3 × 4 = 12

27. वत्सराजः कथं भोजं रक्षितवान् ?

**अथवा**

किमर्थं मुञ्जः भोजं मारयितुं प्रयतते ?

28. हनूमतः बाल्यवृत्तान्तं पद्यानुगुणं सङ्गृह्य लिखत ।

29. ध्रुवः कथं ध्रुवपदम् अलभत ?

VIII. श्लोकं पूरयत – 1 × 4 = 4

30. न चोरहार्यं ..............................................................................

..............................................................................।

..............................................................................

.............................................................................. प्रधानम् ।।

IX. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत – 4 × 1 = 4

31. अरण्ये बहवः प्राणिनः, वृक्षाः च भवन्ति । प्राणिनः अस्माकं मित्राणि सन्ति । ते सर्वे अस्माकं मनांसि रञ्जयन्ति । गगनचुम्बिनः वृक्षाः तत्र शोभन्ते ।

सिंहाः, व्याघ्राः, हरिणाः, वानराः, गजाः, जम्बूकाः इत्यादिमृगाः अरण्ये निवसन्ति । सिंहः उच्चैः गर्जति । वानराः वृक्षात् वृक्षं प्लवन्ते । तेषां पुच्छः दीर्घः भवति । शुकपिकाः फलानि खादन्ति अपि च कूजन्ति । हरिणाः धावन्ति । अरण्यं मनसः सन्तोषं जनयति । अद्य सर्वत्र अरण्यानां नाशः दृश्यते । एतेन प्राणिनां नाशः अपि भवति ।

अतः प्रकृतिसंरक्षणार्थम् अस्माभिः अरण्यस्य संरक्षणम् अवश्यं कार्यम् ।

i) अरण्यं किं जनयति ?

ii) अरण्ये के के प्राणिनः निवसन्ति ?

iii) शुकपिकाः किं खादन्ति ?

iv) प्रकृति संरक्षणार्थम् अस्माभिः किं कार्यम् ?

# भागः - B

## (व्याकरणविभागः)

## (22 अङ्काः)

X. निम्नलिखितेषु प्रश्नेषु अपूर्णविवरणेषु वा प्रत्येकं चत्वारः विकल्पाः प्रदत्ताः । तेषु एकमेव शुद्धं उपयुक्तं वा वर्तते । सम्यक् उत्तरस्य चयनं कृत्वा क्रमाक्षरेण-सह लिखत — 10 × 1 = 10

32. 'आज्ञापयति' – अत्र एषः लकारः भवति –

(A) लृट्   (B) लिट्

(C) लट्   (D) लङ् ।

33. 'औरङ्गजेबेन' – अत्र एषा विभक्तिः वर्तते –

(A) तृतीया विभक्तिः   (B) प्रथमा विभक्तिः

(C) चतुर्थी विभक्तिः   (D) पञ्चमी विभक्तिः ।

34. 'अम्बरम्' – अस्य समानार्थकपदम् इदम् अस्ति –

(A) व्योम   (B) समुद्रः

(C) सागरः   (D) भूमिः ।

35. 'दुष्टः' – अस्य विरुद्धार्थकपदम् इदं भवति –

(A) प्रदुष्टः   (B) शिष्टः

(C) सदुष्टः   (D) आदुष्टः ।

36. 'नायिका' – अस्य अन्यलिङ्गरूपम् इदम् अस्ति –

(A) नायकी   (B) नायिकी

(C) नायकः   (D) नायका ।

37. 'गुरुरवदत्' – अस्य एषः सन्धिः भवति –

(A) गुणसन्धिः   (B) विसर्गसन्धिः

(C) यण्सन्धिः   (D) श्चुत्वसन्धिः ।

38. 'विषं कण्ठे यस्य सः' – अत्र समस्तपदम् इदम् –

(A) विषकण्ठे (B) कण्ठविषः

(C) विषकण्ठः (D) कण्ठेविषः ।

39. पूर्वपदार्थप्रधानः एषः समासः –

(A) अव्ययीभावः (B) तत्पुरुषः

(C) बहुव्रीहिः (D) द्वन्द्वः ।

40. एषु शुद्धं वाक्यम् इदम् अस्ति –

(A) बालकं मोदकं रोचते (B) बालकाय मोदकं रोचते

(C) बालकेन मोदकं रोचते (D) बालकस्य मोदकं रोचते ।

41. 'ह्येषः' – अत्र सन्धिविभजनम् इदं भवति –

(A) ह्यः + एषः (B) ह्यः + ईशः

(C) ह + एषः (D) हि + एषः ।

42. प्रयोगपरिवर्तनं कुरुत – 2 × 1 = 2

a) छात्रः ग्रामं गतवान् ।

b) मया जलं पीयते ।

43. रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत – 2 × 1 = 2

a) संस्कृतकविषु <u>डा० सत्यव्रतशास्त्रिमहोदयः</u> मुकुटमणिरिव विराजते ।

b) बाल्ये शास्त्रिमहोदयस्य गृहपरिसरः <u>संस्कृतमयः</u> आसीत् ।

44. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत – 2 × 1 = 2

a) स्वामिसन्देशं सः आनीतवान् ।

b) विजेता पठितुम् इच्छति ।

XI. वाक्ये विद्यमानं अलङ्कारं सलक्षणं विवृणुत – 3

45. गङ्गा गङ्गेव पावनी ।

XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत – 3

46. नादन्ति सस्यं खलु वारिवाहाः ।

# भागः - C

## (रचनाविभागः)

## (16 अङ्काः)

XIII. संस्कृतभाषया अनुवादं कुरुत — 3

47. ವಿದ್ಯಾರ್ಥಿಜೀವನವು ಅಮೂಲ್ಯವಾಗಿದೆ. ವಿದ್ಯಾರ್ಥಿಗಳು ಸದಾ ಉತ್ಸಾಹದಿಂದ ಇರಬೇಕು ಮತ್ತು ಗುರುಗಳ ಮಾರ್ಗದರ್ಶನವನ್ನು ಅನುಸರಿಸಬೇಕು.

    Student life is very precious. Students should always be enthusiastic. They should follow the guidance of the teacher.

XIV. कर्णाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत — 3

48. प्रतिवर्षं वयं जन्मदिनोत्सवम् आचरामः । तस्मिन् दिने देवालयं गत्वा देवं नमस्कृत्य आगच्छामः । मित्रेभ्यः मधुरं वितरामः ।

XV. पत्रं लिखत — 5

49. उडुपिनगरस्य वाणीविद्यालयस्य सुधा / सुधाकरः इति मत्वा दिनद्वयस्य विरामं सम्प्रार्थ्य कक्ष्याध्यापकं प्रति पत्रं लिखत ।

**अथवा**

उडुपिनगरस्य वाणीविद्यालयस्य सुधा / सुधाकरः इति मत्वा शालावार्षिकोत्सवं प्रति आगन्तुं निवेद्य पितरं प्रति पत्रं लिखत ।

XVI. 50. एकं विषयम् अधिकृत्य प्रबन्धं लिखत — 5

i) परिसरः

ii) समाचारपत्रम्

iii) जनसंख्यास्फोटः ।